Jitāri

# Vādasthānāni

SARIT

SARIT

# Contents

Contents i

I वादस्थानानि ३

१ जातिवादनिरासः ५

२ अनेकान्तवादनिरासः ९

The TEI Header १२

72/ri

# Part I

[

वादस्थानानि]वादस्थानानि

# १ जातिवादनिरासः

बुद्धानामनुरोधेन यथामतिश्रुतिस्मृति ।
ह्रियं विहाय लिख्यन्ते वादस्थानानि कानिचित् ॥§2

तत्र तावद्वादो जातिवाद एव निराक्रियते;--इह यद्वस्तुनो भेदाभेदाभ्यामभिधेयं न भवति तत्सर्वं वस्तु न भवति यथा व्योमकमलम् । न च भेदाभेदाभ्यामभिधेयं सामान्यमितिव्यापकानुपलब्धिः । न तावदय मसिद्धो हेतुः । न हि व्यक्तिभ्यो भिन्नमभिन्नं वा सामान्यं शक्यमभिधातुम् । उभयथाऽप्यसामान्यस्वभावताप्रसङ्गात् । तथा हि;--यदि तावद्व्यक्तिभ्योऽर्थान्तरमेव सामान्यमभिमतं वस्तु; तदा न तत् तासां सामान्यं नाम । यत्खलु यतोऽर्थान्तरं न तत् तस्य सामान्यम्, यथा गोरश्वः । अर्थान्तरं च गोत्वमिति विरुद्धव्याप्तोपब्धिः ॥ §3

ननु च व्यक्तिभ्योऽर्थान्तरं च स्यात् सामान्यं च तासामिति न विरोधं पश्यामः । न चैतन्मन्तव्यमर्थान्तरं चे दर्थान्तरस्य सामान्यम्, सर्वं सर्वस्य 73/ri सामान्यं स्यात् विशेषाभावादिति । यद्धि खल्वेकं वस्त्वनेकत्र समवेतं तत्तदीयं सामान्यम् । गोषु चाश्वो न समवेत इति कथमसौ गवांश्व ? सामान्यं स्यादिति कुतो विशेषाभावः ? तदयमनैकान्तिको *हेतुः कथमिष्टसिद्धये पर्याप्नुयादिति चेत्; तदेतदपि बालप्रलापमनुसरति;--स हि विशेषो बुद्धिमता वक्तव्यो यस्सामान्यपदार्थमात्रभावी सन्नसङ्करेण व्यवस्थामुपपादयेत्, अयं चानेकसमवायः सङ्ख्यासंयोगादीनामवयविकार्यद्रव्यादिष्वप्यस्तीति तान्यपि सङ्ख्यादिमतां सामान्यानि स्युः ॥ अथ मन्येथाः;--सत्यप्यनेकार्थसमवाये यदेव समानज्ञानाभिधानप्रवृत्तिनिमित्तं तदेव सामान्यं नान्यदिति । समानानां भावः सामान्यं भवतोऽस्मादभिधानप्रत्ययाविति भावः ॥ यदाह अक्षपादः;--समानज्ञानाभिधानप्रसवात्मिका जातिः इति । एतदपि स्वप्रक्रियामात्रपरिदीपनम् । तथा हि--अत्र विकल्पद्वयमुदयते । किं ते भेदाः 74/ri स्वरूपेण समानाः स्वहेतोरुत्पन्नाः येषु तत्सामान्यं तथाविधबोधाभिधानप्र-

५ मिति] प्रतिषिद्धस्य वस्तुत्वस्य व्यापकमभिधेयत्वं तस्यानुपलब्धिः.
६ य] भेदाभेदाभ्यामनभिधेयत्वमिति हेतुः.
१२ चे] व्यक्तिरूपस्य.
१५ *] हेतुः सामान्येऽपि सद्भावादनैकान्तिकः.
१६ ये] अर्थान्तरत्वादिसमर्थो भवेत्.
२१ सामान्यं] प्रथमपुरुषद्विवचनान्तप्रयोगोऽयम्.
२२ पादः] योऽर्थोऽनेकत्रप्रत्ययानुवृत्तिनिमित्तं तत्सामान्यम् इति वात्स्यायनभाष्यं तद्वार्तिकं तट्टीकां च पर्यालोच्य नैयायिकाभिप्रायपूरणेनानुवदति;--समानज्ञानाभिधानप्रसवात्मिका जातिः । इति Cf. Nyāyasūtra, II, 2-70 समानप्रसवात्मिका जातिः.
२३ म्] प्रकाशनम्.

माणम् ? आहो स्विदसमाना एवेति ? तत्र ते यदि स्वत एव समानाः समानज्ञानाभिधानं स्वयमेव प्रवर्तयिष्यन्ति; किं तत्र सामान्येनार्थान्तरेण ? तथा च तदसामान्यमेव । तद्बलेन सामान्येन ज्ञानाभिधानयोरप्रयुक्तेः । अथासमानाः, न तर्हि तेषां सामान्यमस्ति । समानानां भावः सामान्यमित्युक्तवानसि । असमानानां भावः सामान्यमिति ब्रुवाणः कथं श्लाघनीयप्रतिज्ञो देवानांप्रियः ? स्वयमसमानभावा अपि तेनैव समानास्त इति चेत्; न; तथा हि--किं ते क्रियन्ते ? किं नु वै व्यवसीयन्ते ? तत्र न तावत्क्रियन्ते, तेषां स्वहेतुभिरेव कृतत्वात् । कृतस्य च पुनः करणायोगात् । अभूतप्रादुर्भावलक्षणत्वात् करणस्य । *समानात्मना क्रियन्त इति चेत्, ननु येषां निष्पन्नतया कृतेः कर्मता नास्ति कथं ते क्रियन्ते नाम ? स्यादेतत्;--येन धर्मिरूपेण ते निष्पन्नाः न तेन करोतेः कर्मभावमनुभवन्ति; किं तु समानेन पुना रूपेणानिष्पन्नाः क्रियन्ते इति न किञ्चिदनुपपन्नम् । एवं तर्हि तदेव समानं रूपं सामान्येन क्रियन्त इति स्यात् । तस्य च भाविनिष्पत्तावनिष्पन्नस्य कारणान्तरतः पश्चादुपजायमानस्य व्यक्तिवद्भावस्वभावता ब्रह्मणाऽप्यशक्या साधयितुम् । अर्थान्तरमेव 75/ri तद्भवतु न किञ्चिदनिष्टमापद्यत इति चेत्; सामान्यान्तर मेव तर्हि तन्नित्यसामान्यजन्यमभ्युपेतं स्यात् । तथा च भेदानां असमानानां कथं सामान्यमिति पर्यनुयोगितेनापि तद्व्यतिरिक्तसामान्यरूपकरणोपगमे सत्यपरापरकार्यसामान्यपरिकल्पनात्मकमनवस्थानमप्रतिविधानमासज्येत । नचाभेदानामसमानं रूपं प्रच्यवेत । नापि द्वितीयपक्षाश्रयणं श्रेयः । न ह्यन्येन अन्ये समाना नाम प्रतीयन्ते । तद्वदन्ये नाम प्रतीयेरन् । भूतवत् । कथं ? गुणेन; अन्यथा हि येन केनचिदन्येन ये केचन समानाः प्रतीयेरन्, *प्रतिनियतां बन्धनाभावात् एकेनानेकसमवायिनार्थेन अन्ये समानाः प्रतीयन्ते ततो नातिप्रसङ्ग इति चेत्, वार्तमेतत् । न खल्ववयविद्रव्यद्वित्वादिसङ्ख्यानामपि एकत्वानेकसमवायिद्वित्वे न स्तः । येन तेभ्योऽवयवादयो न तथावगम्येरन् । अथ तेषां स्वाश्रयेषु समानज्ञानाभिधानसामर्थ्याभावाददोष एषः । ननु सामान्यमपि भेदेष्वेकत्वानेकसमवायाभ्यामेव समानप्रत्ययहेतुतया परिकल्पितम् । अथ ते च अवयव्यादीनामपि युष्माभिरभ्युपेताविति तेषामपि तथाभावः कथमपाक्रियेत ? असामान्यस्वभावत्वात् न तेऽनुमानहेतव इति चेत् । ननु समानज्ञानहेतुत्वे सति सामान्यस्वभावता; तस्यां च सत्यां समानज्ञानहेतुत्वमिति स्फुटमितरेतराश्रयित्वम् । तथा हि;--एकत्वादेः सामान्यत्वात् निमित्तस्य सामान्याभिमतभाववदारब्धद्रव्यादेरपि किं न 76/ri सामान्यरूपतेति पर्यनुयोगे समानप्रत्ययत्वादित्युत्तरमुक्तवानसि । ततस्तदपि समानप्रतीतिनिमित्तत्वं निमित्तस्य समानत्वात् समानमवयव्यादेरपि किं

१ दि] स्वरूपेणैव.
९ *] समानस्वरूपेण.
१५ क्या] निवारयितुम्.
२० नापि] व्यवसीयन्त इति पक्षाश्रयणम्.
२३ *] प्रतीयन्ताम् इति स्यात्.

न स्यादिति अस्मदीयेषु पुनः पर्यनुयोगे सति असामान्यरूपत्वादिति ब्रुवाणः कथमितरेतराश्रयदोषान्मुक्तिमासादयसि ? ॥ §4

एतेनैतदपि प्रत्युक्तं यदुक्तमुद्योतकरेण--न गवि गोत्वं येन गोत्वयोगात् प्राग्गौरेवासाविति व्यर्थं गोत्वं स्यात् । अपि तु यदेव वस्तु तदेव गोत्वेन सम्बध्यते । न च गोत्वयोगात् प्रागवस्त्वस्ति । न चाविद्यमानं गौरित्यगौरिति वा शक्यं व्यपदेष्टुमिति । तथा हि;--यदेव वस्तु तदेव यदि गोरूपं तत्स्वहेतोरुत्पन्नं किं तस्यान्येन गोत्वेन ? अथ अगोरूपं, न तर्हि तस्यागोरितिवाऽश्वादेरिति वा गोत्वेन सह सम्बन्धः स्यात् । न ह्यगोभावो गोत्वं नाम! तस्मात् नार्थान्तरं सामान्यमिति । असामान्यरूपतया अर्थान्तरत्वं व्याप्तं सामान्यात्मतामपहस्तयति, कुतोऽनेकान्तः ? अभिन्नमेव तर्हि सामान्यमस्तीति व्यक्तिव्यतिरिक्तसामान्यनिराकरणात् ॥ §5

दत्तसहायकः साङ्ख्य इदानीं प्रत्यवतिष्ठते; स एवं वक्तव्यः; किं नु वै भवान् व्यक्तीनां सामान्यसंज्ञाकरणकामः ? यद्वा, आत्मातिशयप्रतिपादनकामः ? आद्ये पक्षे न किञ्चित् क्षीयते; न वयं नाम्नि विवदामहे 77/ri । द्वितीयोऽपि पक्षो महतीं मनोराज्यसम्पदमावेदयति । तथा हि;--अत्रापि विकल्पद्वयमुदयते, किं व्यक्तिभ्यः सामान्यस्याभेदः ? उत व्यक्तीनां सामान्यात् ? इति । आद्यपक्षे व्यक्तिवदनेकत्वमसत्त्वं च सामान्यस्य स्यात् । प्रयोगः--व्यक्तिभ्यो यदभिन्नं तदनेकमनित्यं च, यथा तासां प्रातिस्विकं रूपम् । व्यक्तिभ्यस्त्वभिन्नं सामान्यमिति स्वभावहेतुः प्रसङ्गः । नानैकान्तिको हेतुः, एकत्वनित्यत्वयोः सामान्यस्य विरुद्धधर्माध्यासेन व्यक्तिभ्यः सुखादिभ्य इव अन्यस्य एकान्तेन भेदभङ्गात् । अपरस्मिन् पुनर्विकल्पे सामान्यवद्व्यक्तीनमप्येकत्वनित्यत्वे स्याताम् । प्रयोगः--यत्सामान्यादभिन्नं न तद्भिन्नमनित्यं च; यथा तस्यैव सामान्यता; सामान्यादभिन्नं च व्यक्तीनां रूपमिति व्यापकविरुद्धोपलब्धिः प्रसङ्गः । न चानैकान्तिकः, सामान्यादभिन्नं हि सामान्यमेव । तच्चैकं नित्यं चेत्, कथं तदभिन्नं भिन्नमनित्यं च नाम ? एवं ब्रुवाणः सामान्यमेवानेकमनित्यं च ब्रूयात् । तस्य च साक्षादभिन्नत्वनित्यत्वे प्रतिज्ञाय पुनरयं देशान्तरत एव प्रतिभातीति कथं नोन्मत्तः । तस्माद्भेदाभेदाभ्यामवाच्यं सामान्यमिति सिद्धम् ॥ §6

न चायमनैकान्तिको हेतुः । यद्यपि हि सामान्यं भेदाभेदा व्यक्तय एव आभ्यां केवलाभ्यामवाच्यम्, तथापि प्रकारान्तरस्याप्युभयात्मतालक्षणस्य सम्भवात् भिन्नाभिन्नमेव हि सामान्यं चैवमिति जैनाः प्रतिजानते । यदाहुः-- 78/ri

*घटमौलिसुवर्णानां नाशोत्पादस्थितिष्वयम् ।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम् ॥§9

३ रेण] Cf. Nyāyavārtika II, ii, ५९ &५७.
६५.

३३ *] Cf. Āptamīmāṃsā III

न सामान्यात्मनोदेति न व्येति व्यक्तमन्वयात् ।
व्येत्युदेति विशेषेण सहैकत्रोदयादि सत् ॥[§ 11]

*यथा कल्माषवर्णस्य यथेष्टं वर्णनिग्रहः ।
चित्रत्वाद्वस्तुनोऽप्येवं भेदाभेदावधारणा ॥[§ 13]

यदा तु शबलं वस्तु युगपत् प्रतिपद्यते ।
तदान्यानन्यभेदेन सर्वमेव प्रतीयते ॥[§ 15]

एकात्मकं भवेदेतदिति नेश्वरभाषितम् ।
तत्तथैव प्रपत्तव्यं यद्यथैवोपलभ्यते ॥[§ 17]

इति । अत्र प्रतिविधीयते; भेदाभेदयोरन्योन्यप्रतिषेधरूपत्वादेकविधेरपरनिषेधनान्तरीयकत्वात् तत्कथमनयोरेकाधिकरणत्वं मत्तोन्मत्तेतरः प्रतिपद्येत ? तथा हि,--तन्नाम तस्मादभिन्नं यदेव यत्; भिन्नं च तत्तस्माद्यद्यन्न भवति । अतश्च व्यक्तिभ्यस्सामान्यं भिन्नमभिन्नं चेति ब्रुवाणो व्यक्तयस्सामान्यं न व्यक्तिभ्यः सामान्यमिति ब्रूते । कथं स्वस्थचेताश्चेतस्यपि तदेतदारोपयति । प्रयोगः--यद्यदेव न तत् अतद्भवति यथोष्णं वह्निरूपं नामोष्णम् । व्यक्तय एव सामान्यमिति स्वभावविरुद्धोपलब्धिः प्रसङ्गः । उभयथा प्रतीतेरुभयोपगम इति चेत् । ननु, प्रतीतिरप्रतीतेर्वाधिका न तु मिथ्याप्रतीतेः वितथस्यापि प्रतीतिदर्शनात् । अन्यथा हि प्रतीतिपथानुसारिणा भवता द्विचन्द्रादयोऽपि न निह्नोतव्याः । बाधकवशात्ते निह्नूयन्ते इति चेत्; इहाप्येतदनुमानमपि बाध्यादिदोषत्रयरहितलिङ्गजं बाधकं किं न पश्यति देवानांप्रियः ? न संविदो युक्तिभिरस्ति बाधेति चेत्; ननु किमियं राज्ञामाज्ञा येनाविचार्य गृह्येत । प्रत्यक्षस्वभावा संवित् तच्च ज्येष्ठं प्रमाणमतो न बाध्यत इति चेत् । किं पुनरनुमानं लक्षणोपेतमपि बाध्यते ? एवमेतदिति चेत् । न तर्हि इदमनुमानं प्रमाणं स्यात् । लक्षणयुक्तेऽपि बाधसम्भवे तल्लक्षणमेव दूषितं स्यादिति सर्वत्रानुमानेऽनाश्वासः । अथानुमानाभासो बाध्यते ? बाध्यतामध्यक्षाभासः प्रत्यक्षेणैव पुनरियं संवित्तिः तत्कथमिति बाध्यत इति चेत्; नन्वियमपि प्रत्यक्षाभासैव, अनुमानेन बाध्यमानत्वात् । अथ प्रत्यक्षमेव प्रत्यक्षस्य तदाभासतां बाधकत्वात् साधयति न त्वनुमान मित्यभिनिवेशः, कथं तर्हि ज्वालादिविषयायाः प्रत्यभिज्ञायाः प्रत्यक्षायाः प्रत्यक्षाभासता व्यवस्थाप्येत ? न खलु ज्वालादीनामपि क्षणिकत्वमध्यक्षमवधारयेत् । तस्मादनुमानमेव ज्वालादीनां क्षणिकत्वं साधयत् बाधकमेव तस्या इत्यकामेनापि

३ *] Cf. Tattvasamgraha &Pancika ślokas १७४५-४६, cf Ślokavārtika śloka ५७ &५८b &६२b &६३a, pp. ५६१ &५६२

Chowamba Sanskrit Series.
३ था] शबलोवर्णः.
३ थेष्टं] रूपावधारणम्.

तु कुमारिलेनाभ्युपेतव्यम् । न च शक्यं वक्तुं सामान्यमेव केवलं तथा विषयीक्रियत इति! तथा हि तदेवेदं ज्वालात्वमिति स्यात् न सैवेयं ज्वालेति । तस्मान्नानैकान्तिको हेतुरित्यलं बहुप्रलापितया ॥ § 18

॥ जितारिपादानां कृतिर्जातिनिराकृतिस्समाप्ता ॥

# २ अनेकान्तवादनिरासः

81/ri

इदानीमार्हतमतं विचार्यते;--इहामी दिगम्बराः द्रव्यपर्यायरूपेण उत्पत्तिस्थितिप्रलयात्मकं भावग्रामं वर्णयन्ति । तत्रावस्थासु सकलासु अनुगतस्वभावं द्रव्यमाचक्षते, यथा केयूरकटककुण्डलाद्यवस्थास्वनुयायि सुवर्णम् । सत्यद्रव्यात्मनि उत्पादव्ययधर्मकाः पर्यायाः । यथा सत्यपि द्रव्ये जायमाना व्ययमानाश्च केयूरादयः । यथा घटं भञ्जयित्वा मौलिः क्रियते तथा घटो नश्यति मौलिरुत्पद्यते, सुवर्णं तु नोदेति न व्येति, इति उत्पादव्ययध्रौव्यात्मकं वस्तु । यदाह--

*घटमौलिसुवर्णानां नाशोत्पादस्थितिष्वयम् ।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम् ॥ § 22

न नाशेन विना शोको नोत्पादेन विना सुखम् ।
स्थित्या विना न माध्यस्थ्यं तस्माद्वस्तु त्रयात्मकम् ॥ § 24

*न सामान्यात्मनोदेति न व्येति व्यक्तमन्वयात्
व्येत्युदेति विशेषेण सहैकत्रोदयादि सत् ॥ § 26

इति । विरुद्धधर्माध्यासस्य सर्वत्र भेदलक्षणत्वादिति । न ह्येकस्य त्रैरूप्यमुपपद्यते । यदिह सत्यपि विरुद्धधर्माध्यासे द्रव्यपर्याययोरभेदोऽभ्युपगम्यते तदा घटपटयोरप्यभेदोऽभ्युपगन्तव्यः । अथ मन्यसे द्रव्यपर्याययोः परस्परतोऽनैकान्तिको भेदो अभेदो वा अभ्युपगम्यते, किं तु देशकालस्वभावाना मभेदात् उतोच्यते सङ्ख्यासंज्ञालक्षणार्थभेदात् भेदस्तु वर्ण्यते । न हि कटकादीनामन्यो देशोऽन्यं एव सुवर्णस्य च! न च कटकादयः सुवर्णाद्भिन्नकालाः! नापि कटकादीनां सुवर्णस्य च स्वभावे नानात्वमस्ति! अतो देशकालस्वभावानामेकत्वादेकता द्रव्यपर्याययोः । एकं द्रव्यं बहवः पर्याया इति सङ्ख्यासंज्ञाभेदः । अनुवृत्तिलक्षणं द्रव्यं । व्यावृत्तिलक्षणाः प-

८ *] Āptamīmāṃsā III, ५९-५७.
१२ *] Āptamīmāṃsā III, ५९-५७.

१८ भावाना] मभेदादेकतोच्यते इति स्यात्; उत्तरत्र एकत्वादेकता इति निगमनात् ॥

र्यायाः इति लक्षणभेदः । केयूरकटकाभ्यां च कफोणि पाणिभूषणं क्रियते, सुवर्णेन तु केयूरादिकं तदेवेति कार्यमपि भिद्यते द्रव्यपर्याययोः । अतः संख्यासंज्ञालक्षणप्रयोजनभेदात् भिन्नत्वं द्रव्यपर्याययोरिति ॥ § 27

अत्रैवं चिन्त्यते; यदि तावत् द्रव्यपर्याययोः स्वभावाभेदेन अभेदमभिधत्ते तदा द्रव्यपर्याययोरेकरूपतैव तात्त्विकीति संख्यादिभेदाद्भिन्नरूपता कल्पनामात्रकल्पिता स्यात् । 83/ri न हि ययोः स्वभावाभेदः तयोरन्यथा पारमार्थिको भेदः सम्भवी । भेदे च तयोरभिधीयमाने स्वभावभेद एव तयोरभ्युपगतो भवेदिति न तयोः स्वभावाभेदेनाभेदः सिध्येत् । नच तेनैव स्वभावेन भेदश्चाभेदश्च । नचान्येन स्वाभावेन भेदोऽन्येनाभेद इत्यपि प्रेक्षावतो वक्तुमुचितम्! स्वभावभेदाभेदाभ्यां भेदाभेदाभ्युपगमप्रसङ्गात् । यदि चान्येन स्वभावेन भेदोऽन्येन च स्वभावेनाभेद इत्यभ्युपगम्यते तदाऽन्यद्रव्यपर्यायाख्यमेकं वस्तु तयोरन्ये एव चान्योन्यभिन्ना द्रव्यपर्याया इति नैकमनेकात्मकं वस्तु वस्तुतः समर्थितं स्यात् । स्वभावेन चाभेदे देशकालाभेदादभेद इति किमनयाऽनुयुक्तघोषणया । ययोर्हि स्वभावेन भेदो न तयोर्देशकालाभेदादप्यभेदो यथा रूपरसयोः । यदि च पर्यायाणां द्रव्यस्वभावेनाभेदः, तदा पर्यायाणां द्रव्यात्मन्यनुप्रवेशात् द्रव्यमेव केवलमवशिष्यत इति संख्येयभेदाभावात् संख्याबाहुल्यं नास्तीति पर्याया इति बहुवचनं न प्राप्नोति । संज्ञिभेदाभावाच्च न तदाश्रयः संज्ञाभेदः । अथ पर्यायेभ्यो द्रव्यस्वभावेनाभेदः, तदा द्रव्यस्य पर्यायात्मन्यनुप्रवेशात् पर्याया एव केवलभवशिष्यन्त इति संख्यैकत्वाभावात् संख्यैकत्वं नास्तीति द्रव्यमित्येकवचनं न प्राप्नोति ॥ § 28

नचैकानेकवचनप्रयोगमात्राद्वस्तूनामेकत्वानेकत्वे; षण्णगरी दारा इति विनाऽपि भेदाभेदाभ्यां बहुवचनैकवचनप्रयोगदर्शनात् । नच संज्ञिनानात्वमात्रेण संज्ञानानात्वम्; 84/ri एकस्यापि तुरङ्गस्य हरिहयाश्वसप्त्यादिसंज्ञाबाहुल्यदर्शनात् । सति च स्वभावाभेदे लक्षणभेदोऽप्यनुपपत्तिमानेव । न हि द्रव्यपर्याययोरेकत्वे सत्यनुवर्तते द्रव्यं तदात्मकं च पर्यायं रूपं व्यावर्तत इत्युक्तम् । द्रव्यादिपर्यायाणामभेदे तस्मिन्ननुवर्तमाने पर्याया अप्यनुवर्तेरन् । अन्यथा हि तदेवानुवर्तते नानुवर्तते चेति स्यात् । पर्यायेभ्यश्च द्रव्यस्याभेदे तेषु व्यावर्तमानेषु द्रव्यमपि व्यावर्तेत; अन्यथा हि त एव तथैव व्यावर्तन्ते न व्यावर्तन्ते चेति स्यात् । न चैतदनुन्मत्तो ब्रूयात् । स्वभावाभेदं च द्रव्यपर्याययोर्वर्णयता द्रव्यस्य कार्यं यत्तत् पर्यायजातस्य; यच्च पर्यायजातस्य तद्द्रव्यस्येति स्फुटतरमावेदितं भवति । तथा च सति द्रव्यपर्याययोः कार्यभेदो न सम्भवत्येव प्रागेव तन्निबन्धनो भेदः । एकस्याप्यनेककार्यकारित्वदर्शनान्न कार्यभेदाद्भेदः सिध्यति । न हि मलयजमृगाङ्कादयो युगपद्बहूनां बहूनि विज्ञानानि जनयन्तोऽपि स्वभावनानात्वमनुभवन्ति! एक एव प्रदीपः करज-

३ अतः ] Cf. Āptamīmāṃsā IV 72 संज्ञासंख्याविशेषाच्च स्वलक्षणविशेषतः । प्रयोजनादिभेदाच्च तन्नानात्वं न सर्वथा ॥

लालोकादिकमनेकधा कुर्वन्नवलोक्यत इति न कार्यभेदादपि भेदव्यवहारो ज्यायान् । एतेन हि तअन्यदपि प्रत्युक्तम् । यदाह कुमारिलः--

सर्वं हि वस्तु रूपेण भिद्यते न परस्परम् ।[§ 30]

इति । यदि हि यदेव वस्तुत्वं तदेव वेदचाण्डालालापयोः ब्राह्मणचाण्डालयोरपि; तथा वेदचाण्डालालापयोः ब्राह्मणचाण्डालयोश्चैकत्वं स्यात् । अथ वस्तुत्वेनाभेदेऽपि प्रकारान्तरेण भेद इष्यत इति चेत्; प्रकारान्तरं तद्वतो वस्तुरूपादनर्था तरं बा स्यादर्थान्तरं वा ? अनर्थान्तरत्वे कथं 85/ri तदाश्रयो भेदः । अर्थान्तरत्वे स्वरूपेणापि भेदात् भेद एव विशीर्यते । तस्मात् सर्व एव भावाः परस्परव्यावृत्तमूर्तयो न केनचिदंशेन मिश्रा भवन्ति । तदुक्तम्-- [§ 31]

सर्वे भावाः स्वभावेन स्वस्वभावव्यवस्थिताः ।
स्वभावपरभावाभ्यां यस्माद्व्यावृत्तिभागिनः ॥[§ 33]

इति । अतोऽनेकान्तवादो विदुषा न विधातव्यः ॥

दिगम्बरमतपरिक्षा समाप्ता कृतिरियं जितारिपादानाम् ।

प्रत्यभिज्ञानसंज्ञातं प्रमाणं कैश्चिदिष्यते एकत्वविषयम्...॥

# The TEI Header

```
   <teiHeader xmlns=”http://www.tei-c.org/ns/1.0” xml:lang=”en”>
 <fileDesc>
   <titleStmt>
     <title type=”main”>Vādasthānāni</title>
     <author ref=”http://viaf.org/viaf/256072111”>Jitāri</author>
     <funder>German Research Foundation (DFG); Project ”SARIT:
     ↪   Enriching Digital Text Collections in Indology” (Bilalteral Digital
     ↪   Humanities Programme DFG/NEH), 2013-2017</funder>
     <principal>
            <persName>Birgit Kellner</persName>
        </principal>
     <respStmt>
       <resp>data entry by</resp>
       <name key=”aurorachana”>Aurorachana, Auroville</name>
     </respStmt>
     <respStmt>
       <resp xml:id=”sarit-encoder-vastha”>prepared for SARIT
       ↪   by</resp>
       <persName ref=”https://viaf.org/viaf/308710472/”>Liudmila
       ↪   Olalde</persName>
     </respStmt>
   </titleStmt>
   <editionStmt>
     <p> </p>
   </editionStmt>
   <publicationStmt>
     <publisher>”Project SARIT: Enriching Digital Text Collections in
     ↪   Indology” (Bilalteral Digital Humanities Programme
     ↪   DFG/NEH), 2013-2017.</publisher>
     <availability status=”restricted”>
       <p>Copyright Notice:</p>
       <p>Copyright 2016-2017 SARIT</p>
       <licence>
             <p>Distributed under a <ref
             ↪   target=”https://creativecommons.org/licenses/by-
             ↪   sa/4.0/”>Creative Commons Attribution-ShareAlike
             ↪   4.0 International licence.</ref> Under this licence, you
             ↪   are free to:</p>
             <list>
          <item>Share — copy and redistribute the material in any
          ↪   medium or format.</item>
          <item>Adapt — remix, transform, and build upon the
          ↪   material for any purpose, even commercially.</item>
        </list>
             <p>The licensor cannot revoke these freedoms as long as
             ↪   you follow the license terms.</p>
             <p>Under the following terms:</p>
```

```
      <list>
    <item>Attribution — You must give appropriate credit,
    ↪  provide a link to the license, and indicate if changes were
    ↪  made. You may do so in any reasonable manner, but not
    ↪  in any way that suggests the licensor endorses you or your
    ↪  use.</item>
    <item>ShareAlike — If you remix, transform, or build upon
    ↪  the material, you must distribute your contributions
    ↪  under the same license as the original.</item>
  </list>
      <p>More information and fuller details of this license are
      ↪  given on the Creative Commons website.</p>
   </licence>
 <p>SARIT assumes no responsibility for unauthorised use that
 ↪  infringes the rights of any copyright owners, known or
 ↪  unknown.</p>
 </availability>
 <date>2016</date>
</publicationStmt>
<sourceDesc>
 <bibl xml:id="vastha-iyengar-book">
      <title type="main">Tarkabhāṣa and Vādasthāna of
      ↪  Mokṣākaragupta and Jitāripāda</title>
      <author
      ↪  ref="http://viaf.org/viaf/51988959">Mokṣākaragupta</author>
      <author
      ↪  ref="http://viaf.org/viaf/256072111">Jitāripāda</author>
      <editor xml:id="vastha-ri"
      ↪  ref="http://viaf.org/viaf/308736134">H. R.
      ↪  Rangaswami Iyengar</editor>
      <publisher>The Hindusthan Press</publisher>
      <pubPlace>Mysore</pubPlace>
      <date>1952</date>
      <note>pp. 72-84</note>
      <note>The manuscript on which this edition is based is
      ↪  described below.</note>
    </bibl>
 <listWit>
  <witness xml:id="vastha-my" sameAs="#tabha-my">
      <msDesc>
    <msIdentifier>
      <settlement>Mysore</settlement>
      <repository>Mysore Oriental Library</repository>
      <idno/>
      <altIdentifier>
        <idno>M</idno>
      </altIdentifier>
    </msIdentifier>
    <msContents>
```

```
            <msItem>
              <author
              ↪  ref="http://viaf.org/viaf/51988959">Mokṣākaragupta</author>
              <title>Tarkabhāṣa</title>
            </msItem>
            <msItem>
              <author
              ↪  ref="http://viaf.org/viaf/256072111">Jitāri</author>
              <title>Vādasthānāni</title>
            </msItem>
          </msContents>
          <physDesc>
            <objectDesc>
              <p>Palm leaf manuscript written in old Kannada script.
              ↪  Cf. <ref target="#vastha-iyengar-book">Iyengar
              ↪  1952</ref>, p. vii </p>
            </objectDesc>
          </physDesc>
          <history>
            <p/>
          </history>
        </msDesc>
           </witness>
      </listWit>
    </sourceDesc>
  </fileDesc>
  <encodingDesc>
    <p>
           <list>
        <item>Line breaks: In the source file, there were two types of line
        ↪  breaks: returns (and possible surrounding space) and
        ↪  hyphens+returns. These were replaced with lb-elements. The
        ↪  ed-attribute "ri" refers to <ref
        ↪  sameAs="#vastha-iyengar-book">Iyengar's 1952
        ↪  edition</ref>.</item>
        <item>References to other works were enclosed in &lt;ref
        ↪  cRef=""&gt;.</item>
        <item>Round brackets were encoded as &lt;hi
        ↪  rend="brackets"&gt;.</item>
        <item>Square brackets were encoded as &lt;hi
        ↪  rend="squarebrackets"&gt;.</item>
        <item>The footnotes were encoded as note-elements with their
        ↪  corresponding n-attribute.</item>
      </list>
    </p>
    <p>Abbreviations used in the cRef-attributes in this file: <!-- this is a
    ↪  provisory list and has to be replaced by a refsDecl -->
    <list>
        <item>āmī = Āptamīmāṃsā</item>
```

```
        <item>nv = Uddyotakara's Nyāyavārttika </item>
        <item>nsū = Nyāyasūtra</item>
        <item>śv = Ślokavārttika</item>
        <item>tsp = Tattvasaṅgrahapañjikā</item>
      </list>
    </p>
  </encodingDesc>
  <profileDesc><!-- ... --></profileDesc>
  <revisionDesc>
    <change when="2016-07-04"
    ↪   who="https://viaf.org/viaf/308710472/">Corrected wrongly
    ↪   input   to   .</change>
    <change who="https://viaf.org/viaf/308710472/"
    ↪   when="2017-03-25">For a complete history of the changes in this
    ↪   file go to <ref target="https://github.com/sarit/SARIT-
    ↪   corpus/commits/master/vadasthana.xml">SARIT GitHub
    ↪   Repository</ref>.</change>
  </revisionDesc>
</teiHeader>
```